EB/E

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद –बहिःस्थ**

**परीक्षा : जून–जुलै –२०२२**

**सत्र ४ थे**

**विषय: हर्षचरित आणि ऐहोळेप्रशस्ति/ऐतिहासिक काव्ये (EB-4404/19E446)**

**दिनांक :०४/०७/२०२२** **गुण : ८०** **वेळ : स. १०.०० ते १.००**

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र. १ अ) एकमनुच्छेदं माध्यमभाषयानुवदत।** (०८)

१. तमुत्थाप्य पुनरग्रजो जगाद, तात किमेवमतिमहारम्भपरिग्रहेण गरिमाणमारोप्यते बलादतिलघीयानप्यहितः हरिणार्थमतिह्लेपणः सिंहसम्भारः। तृणानामुपरि कति कवचयन्ति आशुशुक्षणयः। अपि च तव अष्टादशद्वीपाष्टमङ्गलमालिनी मेदिनी अस्त्येव विक्रमस्य विषयः। न हि कुलशैलनिवहवाहिनो वायवः संनह्यन्त्यतितरले तूलराशौ।

२. तदद्यैव कृतप्रतिज्ञो गृहाण गौडाधिपाधमजीवितध्वस्तये जीवितसंकलनाकुलकालाकाण्डदण्डयात्रा–चिह्नध्वजं धनुः। न ह्यपरातिरक्तचन्दनचर्चाशिशिरोपचारमन्तरेण शाम्यति परिभवानलपच्यमानदेहस्य देवस्य दुःखदाहज्वरः सुदारुणः। निकारसंतापशान्त्युपायपरिक्षये हि हिडिम्बाचुम्बनास्वादितम् इव रिपुरुधिरामृतम् अमन्दरोपायमपायि पवनात्मजेन।

**आ) एकं श्लोकं माध्यमभाषयानुवदत।** (०४)

१. गृहिणां स्वगुणैस्त्रिवर्गतुङ्गा विहितान्यक्षितिपालमानभङ्गा।
अभवन्नुपजातभीतिलिङ्गा यदनीकेन सकोमलाः कलिङ्गाः।।

२. पुनरपि च जिघृक्षोः सैन्यमाक्रान्तसालं रुचिरबहुपताकं रेवतीद्वीपमाशु।
सपदि महदुदन्वत्तोयसंक्रान्तबिम्बं वरुणबलमिवाभूदागतं यस्य वाचा।।

**प्र.२ अ) चत्वारि वाक्यानि ससन्दर्भं स्पष्टीकुरुत।** (२०)

१. त्यज्यतां सर्वविश्वासिता।
२.औरसदर्शनं हि यौवनं शोकस्य।
३.परित्यक्तं मया शस्त्रम्।
४.सर्वथा स्वस्ति भवत्वार्याय।
५.एकपद एव ननाश शोकावेगः।
६. क्वेदानीं यास्यति दुर्बुद्धिः।

**आ) वाक्यद्वयं ससन्दर्भं स्पष्टीकुरुत।** (१०)

१. नवनवतिसहस्रग्रामभाजां त्रयाणाम्। २. प्रापितावभृथमज्जना बभौ। ३.निजमतनु च राज्यं जीवितं चोज्झति स्म।

**प्र.३ अ) एकां टिप्पणीं लिखत।** (०८)

१. हर्षवर्धनस्य प्रतिज्ञा २. आरम्भश्लोक

**आ) एकां टिप्पणीं लिखत।** (०४)

१. रविकीर्तिः
२. द्वितीयस्य पुलकेशिनः राज्यग्रहणम्

**प्र.४ अ) एकं प्रश्नं सविस्तरमुत्तरत।** (२०)

१. हर्षचरितस्य षष्ठोच्छ्वासे कृतं राज्यवर्धनस्य चरितचित्रणं लिखत।
२. हर्षचरितस्य कविमधिकृत्य लिखत तथा च षष्ठोच्छ्वासस्य वैशिष्ट्यानि लिखत।

**आ) एकं प्रश्नं सविस्तरमुत्तरत।** (०६)

१. ऐहोळेप्रशस्तेः साहित्यदृष्ट्या महत्त्वं स्पष्टीकुरुत।
२. पुराभिलेखानामुद्दिष्टं तथा ऐतिहासिक महत्त्वं स्पष्टीकुरुत।

----------